# બિલ્વાષ્ટકમ્

ત્રિદલમ્ ત્રિગુણાકારમ્ ત્રિનેત્રમ્ ચ ત્રયાયુધમ્ ।
ત્રિજન્મપાપસંહારમેકબિલ્વમ્ શિવાર્પણમ્ ॥ ૧ ॥

ત્રિશાખૈર્બિલ્વપત્રૈશ્ચ હ્યચ્છિદ્રૈઃ કોમલૈઃ શુભૈઃ ।
શિવપૂજામ્ કરિષ્યામિ હ્યેકબિલ્વમ્ શિવાર્પણમ્ ॥ ૨ ॥

અખણ્ડબિલ્વપત્રેણ પૂજિતે નન્દિકેશ્વરે ।
શુદ્ધ્યન્તિ સર્વપાપેભ્યો હ્યેકબિલ્વમ્ શિવાર્પણમ્ ॥ ૩ ॥

શાલિગ્રામશિલામેકામ્ વિપ્રાણામ્ જાતુ અર્પયેત્ ।
સોમયજ્ઞમહાપુણ્યમેકબિલ્વમ્ શિવાર્પણમ્ ॥ ૪ ॥

દન્તિકોટિસહસ્રાણિ વાજપેયશતાનિ ચ ।
કોટિકન્યામહાદાનમેકબિલ્વમ્ શિવાર્પણમ્ ॥ ૫ ॥

લક્ષ્મ્યાઃ સ્તનત ઉત્પન્નમ્ મહાદેવસ્ય ચ પ્રિયમ્ ।
બિલ્વવૃક્ષમ્ પ્રયચ્છામિ હ્યેકબિલ્વમ્ શિવાર્પણમ્ ॥ ૬ ॥

દર્શનમ્ બિલ્વવૃક્ષસ્ય સ્પર્શનમ્ પાપનાશનમ્ ।
અઘોરપાપસંહારમેકબિલ્વમ્ શિવાર્પણમ્ ॥ ૭ ॥

મૂલતો બ્રહ્મરૂપાય મધ્યતો વિષ્ણુરૂપિણે ।
અગ્રતઃ શિવરૂપાય હ્યેકબિલ્વમ્ શિવાર્પણમ્ ॥ ૮ ॥

બિલ્વાષ્ટકમિદમ્ પુણ્યમ્ યઃ પઠેચ્છિવસન્નિધૌ ।
સર્વપાપવિનિર્મુક્તઃ શિવલોકમવાપ્નુયાત્ ॥ ૯ ॥

**********